## गत्वरश्च । (१६४/३१४४)

गत्वरः इति निपात्यते[1] । । गमेरनुनासिकलोपः क्वरप् प्रत्ययश्च[2] । गत्वरः । [3]गत्वरी ॥

## जागुरूकः । (१६५/३१४५)

जागर्तेः [4]ऊकः प्रत्ययो भवति [5]तच्छीलादिषु कर्तृषु । जागरूकः ॥

## यजजपदशां यङः । (१६६/३१४६)

[6]यजादीनां यङन्तानाम् ऊकः प्रत्ययो भवति तच्छीलादिषु कर्तृषु । यायजूकः । जञ्जपूकः । दन्दशूकः ॥

## नमिकम्पिस्म्यजसकमहिंसदीपो रः । (१६७/३१४७)

[7]नम्यादिभ्यः धातुभ्यः तच्छीलादिषु कर्तृषु रः प्रत्ययो भवति । नम्रं काष्ठम् । कम्प्रा शाखा । स्मेरं मुखम् । [8]अजस्रं जुहोति । हिंस्रं रक्षः । दीप्रं [9]काष्ठम् । अजस्रम् इति 'जसु[10] मोक्षणे' (धा. पा. १२१२) नञ्पूर्वो रप्रत्ययान्तः क्रियासातत्ये वर्तते ॥

## सनाशंसभिक्ष उः । (१६८/३१४८)

[11]सन् इति सन्प्रत्ययान्तो गृह्यते न [12]सनिर्धातुः, [13]अनभिधानात् व्याप्तिन्यायाद् वा । [14]सन्नन्तेभ्यो धातुभ्यः [15]आशंसेर्भिक्षेश्च तच्छीलादिषु [16]कर्तृषु उः प्रत्ययो भवति । चिकीर्षुः । जिहीर्षुः । आशंसुः । भिक्षुः । '[17]आङः शसि इच्छायाम्' (धा. पा. ६२९) इत्यस्य[18] ग्रहणं, न शंसेः स्तुत्यर्थस्य (धा. पा. ७२८) ॥

## विन्दुरिच्छुः । (१६९/३१४९)

विदेर्नुमागमः, इषेः छत्वमुकारश्च [19]प्रत्ययो निपात्यते [20]तच्छीलादिषु कर्तृषु । वेदनशीलो विन्दुः । एषणशील [21]इच्छुः ॥

## क्याच्छन्दसि । (१७०/३१५०)

क्य इति [22]क्यच्क्यङक्यषां सामान्येन ग्रहणम् । [23]क्यप्रत्ययान्ताद् धातोः छन्दसि विषये तच्छीलादिषु [24]कर्तृषु उकारप्रत्ययो भवति । मित्रयुः (मै. सं. २.६.१२) । '[25]न छन्दस्यपुत्रस्य' (७.४.३५/३५८८) इति प्रतिषेधाद् न दीर्घः । [26]सुम्नयुः (ऋ. १. ७९. १०) । संस्वेदयुः (मै. सं. ४. १२. २. ४४) छन्दसि इति किम् ? [27]मित्रीयिता ॥

---

1. तच्छीलादिषु कर्तृषु इत्यधिकम् ब. 2. च नास्ति ह, भवति इत्यधिकम् ब. क. 3. गत्वरी नास्ति ब. अ. क. ड. फ. 4. धातोः इत्यधिकम् फ. ह. 5. तच्छीलादिषु कर्तृषु नास्ति अ. क. ह. 6. यज जप दश इत्येतेषां यङन्तानां धातूनाम् ह. 7. नम्यादिभ्यः नास्ति फ. 8. उदाहरणमिदं नास्ति फ, जुहोति नास्ति अ. ब. क. ड. ह. 9. रूपम् ह. 10. धातुः इत्यधिकम् फ, जस अ. क. ड. 11. सन् इति नास्ति अ, सन्प्रत्ययो गृह्यते अ. ब. क. 12. सनतिः ह. 13. अनभिधानात् नास्ति अ. ब. फ. 14. तेन इत्यधिकम् अ. ब. क, सनन्तेभ्यः क. 15. आशंसतेः ब. 16. कर्तृषु नास्ति अ. 17. शासि क. ह, आङः शासु ब. 18. इदं इत्यधिकम् ब. 19. प्रत्ययः नास्ति ब. 20. तच्छीलादिषु कर्तृषु नास्ति अ. 21. इषुः ब. 22. क्यच् क्यङ क्यष् इत्येतेषां अ. ह. 23. क्यन्तात् अ. ब. क. ह. 24. कर्तृषु नास्ति फ, उप्रत्ययः अ. ब. 25. न छन्दसि – दीर्घः नास्ति अ. ब. क. ह. 26. देवान् जिगाति सुम्नयुः अ. 27. पुत्रीयिता अ. ह.